पृथ्व्यादिभूतसंहत्या तथा देहपरीणतेः ।
मदशक्तिः सुराङ्गेभ्यो यद्वत्तद्वच्चिदात्मनि ।। ८४ ।।

पृथिव्यादीनि पृथिव्यप्तेजोवायुलक्षणानि यानि भूतानि तेषां संहतिः समवायः संयोग इति यावत्, तया हेतुभूतया । तथा तेन प्रकारेण या देहस्य परीणतिः परिणामः, तस्याः सकाशात् चिदिति प्रयोगः । यद्वद्यथा सुराङ्गेभ्यो गुडधातक्यादिभ्यो मद्याङ्गेभ्यो मदशक्तिरुन्मादकत्वं भवति, तद्वत्तथा चिच्चैतन्यमात्मनि शरीरे । अत्रात्मशब्देनानेकार्थेन शरीरमेव ज्ञातव्यं, न पुनर्जीवः । अयं भावः । भूतचतुष्टयसंबन्धाद्देहपरीणामः, ततश्च देहे चैतन्यमिति । अत्र परीणतिशब्दे घञभावे ऽपि बाहुलकादुपसर्गस्य दीर्घत्वं सिद्धम् । पाठान्तरं वा ।

"पृथ्व्यादिभूतसंहत्यां तथा देहादिसंभवः ।
मदशक्तिः सुराङ्गेभ्यो यद्वत्तद्वत्स्थितात्मता ।।"

पृथिव्यादिभूतसंहत्यां सत्यां, तथाशब्दः पूर्वश्लोकापेक्षया समुच्चये, देहादिसंभवः । आदिशब्दाद्भूभूधरादयो भुतसंयोगजा ज्ञेयाः । सुराङ्गेभ्यो यद्वन्मदशक्तिर्भवति, तद्वद्भूतसंबन्धाच्छरीर आत्मता सचेतनता स्थिता व्यवस्थितेति । यदुवाच वाचस्पतिः "पृथिव्यापस्तेजो वायुरिति तत्त्वानि तत्समुदाये शरीरविषयेन्द्रियसंज्ञाः, तेभ्यश्चैतन्यं" इति । एवं स्थिते यथोपदिशन्ति तथा दर्शयन्नाह ।

तस्माद्दृष्टपरित्यागाद्यददृष्टे प्रवर्तनम् ।
लोकस्य तद्विमूढत्वं चार्वाकाः प्रतिपेदिरे ।। ८५ ।।

यस्माद्भूतेभ्यश्चैतन्योत्पत्तिः, तस्मात्कारणाद्दृष्टपरित्यागाद्दृष्टं प्रत्यक्षानुभूतमैहिकं लौकिकं यद्विषयजं सुखं तस्य परित्यागाददृष्टे परलोकसुखादौ तपश्चरणादिकष्टक्रियासाध्ये यत्प्रवर्तनं प्रवृत्तिः, तल्लोकस्य विमूढत्वमज्ञानमेवेति चार्वाकाः प्रतिपेदिरे प्रतिपन्नाः । यो हि लोको विप्रतारकवचनोपन्यासत्रासितसंज्ञानो हस्तगतमिहत्यं सुखं विहाय स्वर्गापवर्गसुखप्रेप्सया तपोजपध्यानहोमादौ यद्यतते, तत्र तस्याज्ञानमेव कारणमिति तन्मतोपदेशः ।।

अथ ये शान्तरसपूरितस्वान्ता निरुपमं शमसुखं वर्णयन्ति, तानुद्दिश्य यच्चार्वाका ब्रुवते तदाह ।

साध्यवृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने ।<br>
निरर्था सा मते तेषां धर्मः कामात्परो न हि ।। ८६ ।।

साध्यं ध्यानं द्वेधा, उपादेयं हेयं च । उपादेये धर्मशुक्लध्यानयुगे हेये चार्तरौद्रध्यानयुगे । अथवा साध्ये साधनीये कार्ये, उपादेये पुण्यकृत्ये तपःसंयमादौ, हेये च पापकृत्ये विषयसुखादिके क्रमेण वृत्तिनिवृत्तिभ्यां प्रवर्तननिर्वर्तनाभ्यां जने लोके या प्रीतिर्मनःसुखं जायते समुत्पद्यते, सा तेषां चार्वाकाणां मते निरर्था निःप्रयोजना निःफलातात्त्विकीत्यर्थः । हिर्यस्मात् । धर्मः कामाद्विषयसुखसेवनान्न परः । काम एव परमो धर्मः, तज्जनितमेव च परमं सुखमिति भावः । अथवा ये धर्मप्रभावादिह लोके ऽभीष्टानिष्टकार्ययोः सिद्ध्यसिद्धी वदन्ति, तान्प्रति यच्चार्वाका जल्पन्ति तद्दर्शयन्नाह "साध्यवृत्तिनिवृत्तिभ्यां" इत्यादि । तपोजपहोमादिभिः साध्यस्य प्रेप्सितकार्यस्य या वृत्तिः सिद्धिर्या च तैरेव तपोजपादिभिर-